श्रीसद्गुरू सहजानंदसरस्वती महाराज
विरचित

संक्षिप्त सद्गुरु-चरित्र

श्रीमत् सच्चिदानंद सद्गुरू
श्रीवासुदेवानंतसरस्वती
तथा
श्रीबाबामहाराज सहस्त्रबुद्धे
यांचे ओवीबद्ध चरित्र

ओंकारव्यक्त-रूपं तं वक्रतुण्डं गजाननम् ।
विनायकं गुरुं साक्षात् रामचन्द्रमुपास्महे ।।

दत्त अवधूत पंथींचे दैवत ।
करितों दंडवत त्याचे चरणी ।।

अक्कलकोटनिवासी श्रीस्वामी समर्थ महाराज



तेचि अक्कलकोटीं स्वामी कीं समर्थ ।
भक्तमनोरथ पुरविती ।।

श्रीसद्गुरू रामानंद बीडकर महाराज

मम सद्गुरूंचे रामानंद गुरू ।
करितों नमस्कारू त्यांचे चरणीं ।।

श्रीसद्गुरू वासुदेवानंतरसरस्वती तथा श्रीबाबा महाराज सहस्रबुद्धे



आतां अभिनव थोर नवलाव । दावी जो कीं देव वंदू त्यासी ।।
हृदयमंदिरीं वसे निरंतर । जो कीं परात्पर सद्गुरुराय ।।

श्रीसद्गुरू दिगंबरदास महाराज तथा श्रीसहजानंद सरस्वती



शिष्य सद्गुरूंचा जोशी या कुळींचा । पुत्र गणेशाचा विठ्ठलशर्मा ।।
सद्गुरू बाबांचे आज्ञें तेथें राही । कार्य करवुनि घेई सद्गुरुराज ।।

।।ॐ तत्सत्।।

।। श्रीसद्गुरवे नमः।।

।। श्रीगणेशवन्दनस्तोत्रम् ।।

लंबोदर[१] महाकाय[२] शूर्पकर्ण[३] गजाननम्[४] ।
सर्वार्थसिद्धिदं[५] देवं वंदेऽहं गणनायकम्[६] ।।१।।
गिरिजात्मजं[७] निजानंदं[८] शिवपुत्रं[९] निरंजनम्[१०] ।
भक्तिप्रियं[११] सदाशांतं[१२] वंदेऽहं गणनायकम् ।।२।।
ब्रह्मविष्णुमहेशैश्च वंदितं इष्टकामदम्[१३] ।
विनायकं[१४] गुरूं[१५] नित्यं[१६] वंदेऽहं गणनायकम् ।।३।।
गणंजयं[१७] गणाधीशं[१८] गुणेशं[१९] च परात्परम्[२०] ।
पूर्णं[२१] निर्गुणमाद्यं[२२/२३] च वंदेऽहं गणनायकम् ।।४।।
प्रणवं बिंदुसंयुक्तं[२४] चतुर्वेदप्रवर्तकम्[२५] ।
गानप्रियं[२६] निरालंबं[२७] वंदेऽहं गणनायकम् ।।५।।
कर्ता[२८] धर्ता[२९] च संहर्ता[३०] नियंता[३१] सिध्दिनायकः[३२] ।
सर्वांतः साक्षिकं[३३] तं च वंदेऽहं गणनायकम् ।।६।।
विकटं[३४] धूम्रराजेंद्रं[३५] कृष्णपिंगाक्षसौख्यदम्[३६] ।
हेरबं[३७] वक्रतुडं[३८] च वंदेऽहं गणनायकम् ।।७।।
विश्वाधारं[३९] विभुं[४०] वैद्यं[४१] भवरोगनिवारकम् ।
कृपार्णवं[४२] दिनानाथं[४३] वंदेऽहं गणनायकम् ।।८।।
सुरेशं[४४] च सुरश्रेष्ठं[४५] सुरेंद्रं[४६] सुररक्षकम्[४७] ।
दिव्यदीप्तिप्रभायुक्तं[४८] वंदेऽ हं गणनायकम् ।।९।।

पालकं खेचराणां[४९] च असुराणां विनाशकम्[५०] ।
सिद्धिबुद्धिप्रदं[५१] देवं वंदेऽहं गणनायकम् ।।१०।।
मतिप्रदं[५२] स्वयंज्ञानं[५३] केवलं ज्ञानरूपिणम्[५४] ।
ज्ञानेशं च प्रभुं[५५] साक्षात् वंदेऽहं गणनायकम् ।।११।।
चैतन्यात्मा[५६] स्वयं नित्यं पापघ्नं[५७] धरणीधरम्[५८] ।
त्रिलोकव्यापकं[५९] सत्यं वंदेऽहं गणनायकम् ।।१२।।
नित्यानंदं[६०] परं देवं[६१] भक्ताधीनं[६२] जगत्पतिम्[६३] ।
करुणार्णवं[६४] जगन्नाथं[६५] वंदेऽहं गणनायकम् ।।१३।।
आनंददायकं[६६] नित्यमानंदं[६७] स्वात्मसौख्यदम्[६८] ।
वेदांतस्य[६९] रहस्यार्थं वंदेऽहं गणनायकम् ।।१४।।
तुरीयं[७०] तत्पदं मूलं[७१] चतुर्वाणीप्रवर्तकम्[७२] ।
स्वसंवेद्यं[७३] स्वत:सिद्धं[७४] वंदेऽहं गणनायकम् ।।१५।।
मूलाधारं[७५] रक्तवर्णं[७६] रक्तांगं[७७] भक्तपूजितम्[७८] ।
रक्तपुष्पप्रियं[७९] देवं वंदेऽहं गणनायकम् ।।१६।।
नादबिंदुकलातीतं[८०] स्वयंज्योति:[८१] सनातनम्[८२] ।
वाहनं मूषकं यस्य वंदेऽहं गणनायकम् ।।१७।।
मुदितं[८३] मोदकं[८४] चैव चतुर्मुक्तिप्रदायकम्[८५] ।
आद्यंतरहितं[८६] ध्वान्तं[८७] वंदेऽहं गणनायकम् ।।१८।।
वागीशं[८८] वाक्पदं[८९] वादं[९०] द्वंद्वातीतं[९१] विमत्सरम[९२] ।
स्नेहार्द्रं[९३] सद्गुरुं[९४] देवं वंदेऽहं गणनायकम् ।।१९।।
लोकपालं[९५] लोकनाथं[९६] साक्षादाग्निस्वरूपिणम्[९७] ।
दु:खघ्नं[९८] पुण्यदातारं[९९] वंदेऽहं गणनायकम् ।।२०।।
एकदंतं[१००] चतुर्हस्तं[१०१] पाशमंकुशधारिणम्[१०२] ।
रक्तवस्त्रपरीधानं[१०३] वंदेऽहं गणनायकम् ।।२१।।

सर्वं खल्विदंब्रह्माख्यं[१०४] रुचिरं मोदकप्रियम्[१०५]।
विकाररहितं[१०६] नित्यं वंदेऽहं गणनायकम् ।।२२।।
वरदं[१०७] विघ्नराजेंद्रं[१०८] महाविघ्नप्रमोचकम्[१०९]।
शुभदं[११०] समतायुक्तं[१११] वंदेऽहं गणनायकम् ।।२३।।
जगन्नाट्यप्रियं[११२] नित्यं वेदाधिष्ठानमव्ययम्[११३/११४]।
उपनिषत्सारदं[११५] देवं वंदेऽहं गणनायकम् ।।२४।।
चिन्मयं[११६] सच्चिदानंदं[११७] अद्वितीयं[११८] गुणात्मकम्[११९]।
कालातीतं[१२०] स्वयंतत्त्वं[१२१] वंदे सिद्धिविनायकम् ।।२५।।
पंचविंशतिभि: श्लोकैर्ग्रथिता पुष्पमालिका।
समर्पिता मया कंठे गणेशस्य कृपानिधे: ।।२६।।
सद्गुरुप्रेरितं स्तोत्रं य: पठेद्भक्तिमान् नर:।
भुक्तिं मुक्तिं तथा शांतिं लभते नात्र संशय: ।।२७।।
एकवारं पठेन्नित्यं व्याधिमुक्तो भवेन्नर:।
द्विवारं य: पठेन्नित्यं तस्य शत्रून् विनश्यति ।।२८।।
त्रिवारं य: पठेन्नित्यं धनधान्यसमन्वित:।
भवेल्लक्ष्मीयुत: सत्यं शुद्धभक्तिसमन्वित: ।।२९।।
लक्षपाठाद्गणेशस्य दर्शनं सत्वरं भवेत्।
एवं वरो मया प्राप्तो गणेशस्य प्रसादत: ।।३०।।
सद्गुरुप्रेरितं स्तोत्रमर्पितं तत्पदांबुजे।
भक्तिभावेन दासेन नम्रेण शिरसा सदा ।।३१।।

।। इति श्रीसद्गुरुप्रेरितं गणेशवरप्रदं श्रीगणेशवन्दनस्तोत्रं सम्पूर्णम्।।

।। श्रीसद्गुरूचरणारविन्दार्पणमस्तु ।।